प्रियशब्दादिसेवनादिकं । न चात्राहारस्य निषेधः । प्रातराशे त्वजीर्णे तु सायमाशो न दुष्यतीति वचनेन सायमाशस्यावश्यं कर्त्तव्यत्वात् ॥*॥ आमाजीर्णस्य लक्षणमाह,—

"तत्रामे गुरुतोत्क्लेशः शोथो गण्डाक्षिकूटगः ।
उद्गारश्च यथाभुक्तमविदग्धः प्रवर्त्तते" ॥

गुरुता उदराङ्गयोः । उत्क्लेशः उपस्थितं वमनमिव । अक्षिकूटोऽक्षिपुटकः । अविदग्धः अनम्लो निर्गन्धश्च ॥*॥ विदग्धाजीर्णस्य लक्षणमाह,—

"विदग्धे भ्रमतृण्मूर्च्छापित्ताच्च विविधा रुजः ।
उद्गारश्च सधूमाम्लः स्वेदो दाहश्च जायते" ॥

विविधा रुजः शोषचोषदाहादयः ॥*॥ विष्टब्धाजीर्णस्य लक्षणमाह,—

"विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः ।
मलवाताप्रवृत्तिश्च स्तम्भो मोहोऽङ्गपीड़नं" ॥

वातवेदनाः तोदभेदादयः । स्तम्भो गात्राणां । मोहो मूर्च्छा ॥*॥ रसशेषाजीर्णस्य लक्षणमाह,

"रसशेषेऽन्नविद्वेषो हृदयाशुद्धिगौरवे" ॥*॥

एतस्य उपद्रवानाह,—

"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः ।
उपद्रवा भवन्त्येते मृतिश्च रसशेषतः" ॥*॥

अतिप्रवृत्तेभ्यः आमाद्यजीर्णेभ्यो विसूच्यादिरोगानाह,—

"आमं विदग्धं विष्टब्धमित्यजीर्णं यदीरितं ।
विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका" ॥

तत्र यथासङ्ख्यं तदा विसूच्यादिलम्बिका भवितुमर्हति । सा च कफवाताभ्यां भवतीत्येकैकतोऽजीर्णादिसूच्यादित्रयोत्पत्तिः ॥*॥ विसूच्यादिनिरुक्तिमाह,—

"सूचीभिरिव गात्राणि तुदन्सन्तिष्ठतेऽनिलः ।
यत्राजीर्णेन सा वैद्यैर्विसूचीति निगद्यते" ॥*॥

विसूच्या निदानमाह,—

"न तां परिमिताहारा लभन्ते विदितागमाः ।
मूढ़ास्तामजितात्मानो लभन्तेऽशनलोलुपाः" ॥

विदितागमाः ज्ञातायुर्वेदाः ॥*॥ विसूच्या लक्षणमाह,—

"मूर्च्छातिसारौ वमथुः पिपासा
शूलं भ्रमोद्वेष्टनजृम्भदाहाः ।
वैवर्ण्यकम्पौ हृदये रुजश्च
भवन्ति तस्यां शिरसश्च भेदः" ॥

उद्वेष्टनं हस्तपादयोः । शिरसो भेदः शिरःशूलं ॥ विसूच्या उपद्रवानाह,—

"निद्रानाशोऽरतिः कम्पो मूत्राघातो विसंज्ञता ।
अमी उपद्रवा घोरा विसूच्याः पञ्च दारुणाः" ॥

अमी उपद्रवा घोरा अमी निद्रानाशादयः उपद्रवोः सर्व्वेषामेव रोगाणां घोरा भयङ्कराः । विसूच्याः पञ्च दारुणा विसूच्यास्तु पञ्चापि यदि स्युस्तदा दारुणाः प्राणभयङ्कराः ॥*॥ अलसकलक्षणमाह,—

"कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत् परिकूजति ।
निरुद्धो मारुतश्चैव कुक्षावुपरि धावति ॥
वातवर्चो निरोधश्च यस्यात्यर्थं भवेदपि ।
तस्यालसकमाचष्टे तृष्णोद्गारौ च यस्य तु" ॥

आनह्यते आध्मायते । प्रताम्येत् ग्लायति । परिकूजति आर्त्तनादं करोति । कुक्षौ अजीर्णेन निरुद्धो मारुतः उपरि धावति हृदयकण्ठादिकं गच्छतीत्यर्थः । काश्यपस्त्वाह,—

"नाधो याति न चाप्यूर्द्ध्वमाहारो न च पच्यते ।
कोष्ठे स्थितोऽलसीभूतस्ततोऽसावलसः स्मृतः" ॥

विसूच्यलसयोररिष्टमाह,—

"यः श्यावदन्तौष्ठनखोऽल्पसंज्ञः
छर्द्द्यर्दितोऽभ्यन्तरयातनेत्रः ।
क्षामस्वरः सर्व्वविमुक्तसन्धि-
र्यायान्नरः सोऽपुनरागमाय" ॥

सर्व्वविमुक्तसन्धिः सर्व्वे विमुक्ताः शिथिलीभूताः सन्धयो यस्य सः ॥*॥ विलम्बिकाया लक्षणमाह,—

"दुष्टञ्च भुक्तं कफमारुताभ्यां
प्रवर्त्तते नोर्द्ध्वमधश्च यत्र ।
विलम्बिकां तां भृशदुश्चिकित्स्या-
माचक्षते शास्त्रविदः पुराणाः" ॥

भृशदुश्चिकित्स्यां प्रत्याख्यायोपचरणीयम् । इयमसाध्येवेति जेज्जटः ॥*॥ जीर्णस्याहारस्य लक्षणमाह,—

"उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितं ।
लघुता क्षुत्पिपासे च जीर्णाहारस्य लक्षणं" ॥*॥

अथ चिकित्सा,—

"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुड़ेन वा ।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी ॥
गुड़ेन शुण्ठीमथवोपकुल्यां
पथ्यां तृतीयामथ दाड़िमं वा ।
आमेष्वजीर्णेषु गुदामयेषु
वर्चो विबन्धेषु च नित्यमद्यात्॥
योयं दन्ती त्रिवृच्चित्रं कृष्णामूलं विचूर्णितं
तच्चूर्णं गुड़संमिश्रं भक्षयेत् प्रातरुत्थितः ॥
एतद्गुड़ाष्टकं नाम बलवर्णाग्निवर्द्धनं ।
शोथोदावर्त्तशूलघ्नं प्लीहपाण्ड्वामयापहं ॥

सर्व्वचूर्णसमो गुड़ो देयः । केचित्तु द्विगुणं गुड़ं दत्त्वा गुटिकां कुर्व्वन्ति । रेचकोऽयं योगः । गुड़ाष्टकम् ॥*॥ दहनाजमोदसैन्धवनागरमरिचानि चाम्लतक्रेण । सप्ताहादधिकरं पाण्डुशोनाशनं परमं ॥ औषधमित्यध्याहार्य्यं,—

"तत्रामे वमनं कार्य्यं विदग्धे लङ्घनं हितं ।
विष्टब्धे स्वेदनं शस्तं रसशेषे शयीत च ॥
वचा लवणतोयेन वान्तिरामे प्रशस्यते ॥
कणासिन्धुवचाकल्कं पीत्वा वा शिशिराम्भसा ॥

जलमत्र शरावमात्रं । वचा कर्षार्द्धमिता । सैन्धवं कर्षार्द्धमितं । द्वयोश्चूर्णयुतेन जलेन पीतेन ।

"कणादिकल्कं वा पीत्वा वान्तिरामे प्रशस्यते"

इत्यनेनान्वयः ॥*॥

"धान्यनागरसिद्धं वा तोयं दद्याद्विचक्षणः ।
आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोधनं ॥
भवेद् यदि प्रातरजीर्णशङ्का
तदाभयां नागरसैन्धवाभ्यां ।
विचूर्णितां शीतजलेन भुक्त्वा
भुञ्जीत भक्तं मितमन्नकाले ॥
विदह्यते यस्य तु भुक्तमात्रं
दंदह्यते हृच्च गलश्च यस्य ।
द्राक्षां सितामाक्षिकसम्प्रयुक्तां
लिह्याभयां चापि सुखं लभेत ॥
त्रिकटुकमजमोदा सैन्धवं जीरके द्वे
समधरणधृतानामष्टमो हिङ्गुभागः ।
प्रथमकवलभुक्तं सर्पिषा चूर्णमेत-
ज्जनयति जठरेऽग्निं वातरोगांश्च हन्ति" ॥

अजमोदात्र यवानी । अन्तःसंमार्ज्जकत्वात् । जीरके द्वे शुक्लं कृष्णञ्च । धरणमत्र मानं । तेन समधरणं धृतानां तुल्यमानं गृहीतानां शुण्ठ्यादीनां भागाः सप्त । तत्राष्टमो भागो हिङ्गुनः । हिङ्ग्वष्टकम् ॥*॥

"शुद्धं सूतं गन्धकञ्च पलमानं पृथक् पृथक् ।
हरीतकी च द्विपला नागरस्त्रिपलः स्मृतः ॥
कृष्णा च मरिचं तद्वत् सिन्धूत्थं त्रिपलं मतं ।
चतुष्पला च विजया मर्द्दयेन्निम्बुकद्रवैः ॥
गुटानि सप्त देयानि घर्म्ममध्ये पुनः पुनः ।
अजीर्णारिरियं प्रोक्तः सद्यो दीपनपाचनः ॥
भक्षयेद्द्विगुणं भक्ष्यं पाचयेद्रेचयेदपि ।

अजीर्णारिः ॥*॥

"द्वौ क्षारौ चित्रकं पाठा करञ्जं लवणानि च ।
सूक्ष्मैलापत्रकं भार्गी कृमिघ्नं हिङ्गु पौष्करं॥
शटी दार्व्वी त्रिवृन्मुस्तं वचा चेन्द्रयवास्तथा ।
वृक्षाम्लं जीरकं धात्री श्रेयसी चोपकुञ्चिका ॥
अम्लवेतसमम्लीका यवानी देवदारु च ।
अभयातिविषा श्यामा हपुषारग्वधं समं ॥
तिलमुष्ककशिग्रूणां कोकिलाक्षपलाशयोः ।
क्षाराणि लौहकिट्टञ्च तप्तं गोमूत्रसेचितं ॥
समचूर्णानि कृत्वा तु समभागानि कारयेत् ।
मातुलुङ्गरसेनैतद्भावयेद्दिवसत्रयं ॥
दिनत्रयन्तु शुक्तेन तथार्द्रकरसेन च ।
अत्यग्निकारकं चूर्णं प्रदीप्ताग्निसमप्रभं ॥
उपयुक्तं विधानेन नाशयत्यचिराद्गदान् ।
अजीर्णमथ गुल्मांश्च प्लीहानं गुदजानि च॥
उदराण्यन्त्रवृद्धिञ्च अष्ठीलां वातशोणितं ।
प्रणुदत्युल्वनान्दोषान्नष्टमग्निं प्रदीपयेत्॥

द्वौ क्षारौ स्वर्ज्जिका यवक्षारश्च । लवणानि पञ्च। वृक्षाम्लं विषाम्बिल इति लोके । श्रेयसी हरीतकी । उपकुञ्चिका मगरैला । अम्लवेतसाभावे चुक्रं दातव्यं । श्यामा सारिवा । मुष्ककः मोख इति लोके । कोकिलाक्षः कोइलखा इति लोके । बृहदग्निमुखचूर्णं ॥*॥

"कुष्ठार्कचित्रकैरण्डवरुणं सपुनर्णवं ।
तिलापामार्गकदलीपलाशं तिन्तिड़ी तथा ॥
गृहीत्वा ज्वालयेदेतत् प्रस्थं भस्माखिलञ्च तत् ।
जलाढके विपक्तव्यं यावत् पादावशेषितं ॥
सुप्रसन्नं विनिःस्राव्य लवणप्रस्थसंयुतं ।
पक्त्वं विधूमकठिनं सूक्ष्मचूर्णीकृतं पुनः ॥
यवानीजीरकव्योषस्थूलजीरकहिङ्गुभिः ।